## अथद्वितीयोऽध्याय : chapter-2

मांधातोवाच - कथं तदमभू[६१(१)] क्षेत्रं स्यातं श्रीमालसंज्ञया ।
कथं तत्र गता लक्ष्मीर्देवी तुष्टा वरं ददौ ॥ १

कथं तत्रतपस्तेपे गौतमो मुनि-सत्तम[६२] : ।
एतदाचक्ष्व सर्वं मे प्रसन्नोऽसि यदि द्विज[६३] ॥ २

वसिष्ठउवाच - शृणुष्वावहितो राजन् शुचिस्तद्गत मानस । १
धर्म्यं श्रीतीर्थ माहात्म्यं[६४] नृणां कीर्ति विवर्धनम् ॥
यथा हि गौतमः पूर्वं चक्रे[६५] तत्राश्रमं नृप ॥ ३

पुरा स गौतमः शिष्यैः सह वेदविशारदैः[६५(१)] ।
आजगामाश्रमं धीमान् जाबालेरालयं[६६] किल ॥ ४

स तेन विधिना सम्यक् सत्कृतः सुकृतेषिणा ।
प्रवालैः स्वर्णदानैश्च रत्नैरूच्चावचैरपि ॥ ५

सप्त-रात्रमथोषित्वा कथयन्विविधाः[६६(१)] कथाः ।
जगाम हिमवत्पार्श्वं बहुमूलफलोदकम्[६७] ॥ ६

भृगुतुंगं समासाद्य चचार सुमहत्तपः ।
भृगुप्रश्रवणे रम्ये नानामूल फलोदके ॥ ७

---

६१-(१) ई तदभवधाव, ६२- ई बी ६२ म, ६३- इ बी दिविजः, ६४- इ बी श्रीकार्तिवर्द्धन, ६४(१) ई- यथाचगौतमः, ६५ ई बी - त्र, ६५- इ (१) सहदेव विशारदैः , ६६ इ बी- जावाले ए- जैवले, ६६(१) ई- प्रवरे इ प्रावारैः ६६-(१) इ बी- व, ६७- बी-कै

--

हंसकारंडवाकीर्णे चक्राकोपशोभिते ।। ८

१ए
उल्लसत्पुष्पगंधाढ्ये, कदलीखंडमंडिते ।

(६८)
तत्राशोकतरोर्मूलमासाद्य मुनिसत्तम: ।। ९

अशोको हं भवामीति शुचि: स्नात्वा समाहित : ।

(६८)(१)
देवमाराधयामास शूलपाणिं महेश्वरम् ।। १०

पंचाग्निसाधको ग्रीष्मे जपहोमपरायण: ।

वर्षास्वाकाशशायीच हेमंते सलिलाश्रय: ।। ११

(बी ६१)
एवं वर्षशते साग्रे गते तस्य नरोत्तम ।

परितुष्टो महादेवो महर्षे दर्शनं ययौ ।। १२

स दृष्ट्वा पुरतो देवं सूर्यकोटिसमप्रभम् ।

(७०)
त्रिनेत्रं वृषमारूढं जटामंडनशोभितं ।।

(७१)
तुष्टाव गौतमो राजन्निदं स्तोत्रमुदीरयन् ।। १३

गौतम उवाच स्तुति:- नमस्ते जगतांनाथ नमस्ते प्रमथाधिप ।। १४

७२
नमस्ते पार्वतीकांत नमस्ते वृषभध्वज ।

नमोऽष्टमूर्तये तुभ्यं चराचरमयाय च ।। १५

७३ (२) ७४
न ते पारविदो देव योगिनोह्यव्यवक्षण: ।

(३)बी(७५), (४) (७६)
यद्रूपं स्थूलभूतं च सदसद्व्यक्तात्मकम् ।। १६

---

बी(६८) तत्राशोतरोमूल, ई ६८(१) देवामाराधयामास:

६९ ई बी ६९ म: ए म, ७० ई बी मंडमंडल, ७१-ई बी इंदस्तोत्रमुदीरयते, ई बी ७२ वृषभद्विजा, ७३- ई बी दे, ७४- ई बी नो, ७५ ई बी यदथास्थूल, ७६- ई बी सदसत्परात्मकं ।

ए (१) उचतपुष्पगन्धाढ्ये ए (२) योगिनी
ए (३) यद्रूपं ए (४) स्थूमूंतच ।

-----

भूतं भव्यं भविष्यं च तत्सर्वं भुवनोद्भवम् ।
(१) (७८) (७९)
विभूतिस्ते महेशान प्रसीद मदनाद्विषः ।। १७

(८०) ८०(१)
तदादिश वनं शैलं तीर्थं वा चोत्तमम् ।
(२) (८१)
यत्र स्थितो महादेव करोमि गतभि तपः ।। १८

८१(१) (८२)
कियान्शापावधिकालः प्रियाया वर्तते मम ।
प्रसीद देवदेवेश शरणं भव मे भव ।। १९

देवदेवउवाच :- साधु गौतम भद्रं ते प्रसन्नः कथयाम्यहम् ।
सदात्मदयितं स्थानं देवानामपिदुर्लभम् ।। २०

८२(१) (८३)
यत्र पूर्वं मया योगमास्थाय विहितं तपः ।
(३)(८४)
कामिकेन मखनेष्टुं त्रिपुरक्षयकांक्षिणा ।। २१

८४(१) (८५) ८५(१)
अस्ति सौगंधिकादद्रेरुत्तरस्यां दिशि द्विज ।
वायव्यामबुदारण्यात् सिद्धगंधर्वसेवितम् ।। २२

सरस्त्र्यंबकं नाम सर्वपापप्रणाशनम् ।
वांछासिद्धिकरं लोके मुनीनां भावितात्मनाम् ।
यदिच्छसि परां सिद्धिं तत्र त्वं याहि गौतम ।। २३

-----------

७८- ई बी - सद्दे, ७९- बी - द्विषन्महादि, बी (८०) तत्रतं, ८०(१) ई भूतमयत्र
८१-(बि)- सपः, ८२-बी- ब्रवः, (८१)(१) ई- कियानुशापावधिकालो (२) कियन्शापावधि
८२(बी)- तमः (८२) (१) ई- आसाय, (८३) ई बी- विहितंपरं, ८४-ई-बी कामकेन नमस्तेरव
नैर्ऋतत्रिपुर, ८४(१) ई - यत्रअसास्ति, ८५- ई बी - घ , ८५(१) ई द्विज :

-----

ए (१) विभुति ए (२) गतभि स्तयः
ए (३) मरवे नेष्ठां

-------

गौतम उवाच :- (१) ८५(२) (२)
देवदेव तपस्तप्स्ये तत्राहं त्वदनुग्रहात् ।
८६
आयान्तु सर्वतीर्थानि सरितश्च सरांसि च ।। २४

(८७)
देवा ब्रह्मादयः शंभो ऋषयश्च तपोधनाः ।
बी (८८)
चिरमव्याहता प्रीतिरस्तु सान्निध्यलिप्सया ।। २५

वसिष्ट उवाच :- ८८(१) (३) ८८(२)
एवमस्तु मुने तुभ्य मित्युक्त्वान्तर्दधे हरः ।
(८९)(४)
गौतमोऽथ मुनिर्भूप तच्छ्रुत्वा विस्मयान्वितः ।।२६

(५)
तपः फलं समाधाय पृच्छय वनदेवताः ।
ययौ शिष्यगणैः सार्द्धं यत्र त्र्यंबक सरः ।। २७

इति श्री स्कंदपुराणे एकाशीति साहस्र्यां संहितायां ब्राह्म्य विभागे तृतीय परिच्छेदे श्रीमाल महात्म्ये गौतमवरप्रदानं नाम द्वितीयोध्यायः ((१२))

-----

८५-(२) ई- देवदेव तपस्तप्त्वात्वत्रहं, ८६- ई बी- तु, ८७- ई बी - व
८८- ई बी- कृतिवाञ्छया:, ८८-(१) ई एवस्तु, ८८(२) ई मित्युक्तांतर्दधेहर:
८९- बी ततेश्रुत्वा ।

(१) ए तत्रायै ।
(२) ए तुदनुग्रहात् ।
(३) ए त्पन्वां
(४) ए तच्छुत्वा
(५) ए च्छय ।

------------